श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ षडधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षडधिकशततमः सर्गः ॥

## रावणस्य रथं दृष्ट्वा श्रीरामेण मातलेः प्रबोधनं रावणपराजयस्य श्रीरामविजयस्य च सूचकानां शकुनानां वर्णनम्

सारथिः स रथं हृष्टः परसैन्यप्रधर्षणम्।
गन्धर्वनगराकारं समुच्छ्रितपताकिनम्॥ **6.106.1** ॥

युक्तं परमसम्पन्नैर्वाजिभिर्हेममालिभिः।
युद्धोपकरणैः पूर्णं पताकाध्वजमालिनम्॥ **6.106.2** ॥

ग्रसन्तमिव चाकाशं नादयन्तं वसुन्धराम्।
प्रणाशं परसैन्यानां स्वसैन्यस्य प्रहर्षणम्॥ **6.106.3** ॥

रावणस्य रथं क्षिप्रं चोदयामास सारथिः।
तमापतन्तं सहसा स्वनवन्तं महाध्वजम्॥ **6.106.4** ॥

रथं राक्षसराजस्य नरराजो ददर्श ह।
कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा॥ **6.106.5** ॥

दीप्यमानमिवाकाशे विमानं सूर्यवर्चसम्।
तडित्पताकागहनं दर्शितेन्द्रायुधप्रभम्॥ **6.106.6** ॥

शरधारा विमुञ्चन्तं धाराधरमिवाम्बुदम्।
स दृष्ट्वा मेघसङ्काशमापतन्तं रथं रिपोः॥ **6.106.7** ॥

गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशस्वनम्।
विस्फारयन् वै वेगेन बालचन्द्रानतं धनुः॥ **6.106.8** ॥

उवाच मातलिं रामः सहस्राक्षस्य सारथिम्।
मातले पश्य संरब्धमापतन्तं रथं रिपोः॥ **6.106.9** ॥

यथापसव्यं पतता वेगेन महता पुनः।
समरे हन्तुमात्मानं तथानेन कृता मतिः॥ **6.106.10** ॥

तदप्रमादमातिष्ठ प्रत्युद्गच्छ रथं रिपोः।
विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम्॥ **6.106.11** ॥

अविक्लवमसम्भ्रान्तमव्यग्रहृदयेक्षणम्।
रश्मिसञ्चारनियतं प्रचोदय रथं द्रुतम्॥ **6.106.12** ॥

कामं न त्वं समाधेयः पुरन्दररथोचितः।
युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये॥ **6.106.13** ॥

परितुष्टः स रामस्य तेन वाक्येन मातलिः।
प्रचोदयामास रथं सुरसारथिरुत्तमः॥ **6.106.14** ॥

अपसव्यं ततः कुर्वन् रावणस्य महारथम्।
चक्रसम्भूतरजसा रावणं व्यवधूनयत्॥ **6.106.15** ॥

ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः।
रथप्रतिमुखं रामं सायकैरवधूनयत्॥ **6.106.16** ॥

धर्षणामर्षितो रामो धैर्यं रोषेण लम्भयन्।
जग्राह सुमहावेगमैन्द्रं युधि शरासनम्॥ **6.106.17** ॥

शरांश्च सुमहावेगान् सूर्यरश्मिसमप्रभान्।
तदुपोढं महद् युद्धमन्योन्यवधकाङ्क्षिणोः।
परस्पराभिमुखयोर्दृप्तयोरिव सिंहयोः॥ **6.106.18** ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
समीयुर्द्वैरथं द्रष्टुं रावणक्षयकाङ्क्षिणः॥ **6.106.19** ॥

समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः।
रावणस्य विनाशाय राघवस्योदयाय च॥ **6.106.20** ॥

ववर्ष रुधिरं देवो रावणस्य रथोपरि।
वाता मण्डलिनस्तीव्रा व्यपसव्यं प्रचक्रमुः॥ **6.106.21** ॥

महद्गृध्रकुलं चास्य भ्रममाणं नभस्थले।
येन येन रथो याति तेन तेन प्रधावति॥ **6.106.22** ॥

सन्ध्यया चावृता लङ्का जपापुष्पनिकाशया।
दृश्यते सम्प्रदीप्तेव दिवसेऽपि वसुन्धरा॥ **6.106.23** ॥

सनिर्घाता महोल्काश्च सम्प्रपेतुर्महास्वनाः।
विषादयंस्ते रक्षांसि रावणस्य तदाहिताः॥ **6.106.24** ॥

रावणश्च यतस्तत्र प्रचचाल वसुन्धरा।
रक्षसां च प्रहरतां गृहीता इव बाहवः॥ **6.106.25** ॥

ताम्राः पीताः सिताः श्वेताः पतिताः सूर्यरश्मयः।
दृश्यन्ते रावणस्याग्रे पर्वतस्येव धातवः॥ **6.106.26** ॥

गृध्रैरनुगताश्चास्य वमन्त्यो ज्वलनं मुखैः।
प्रणेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः॥ **6.106.27** ॥

प्रतिकूलं ववौ वायू रणे पांसून् समुत्किरन्।
तस्य राक्षसराजस्य कुर्वन् दृष्टिविलोपनम्॥ **6.106.28**॥

निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः।
दुर्विषह्यस्वरा घोरा विना जलधरोदयम्॥ **6.106.29**॥

दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः।
पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत्॥ **6.106.30**॥

कुर्वन्त्यः कलहं घोरं सारिकास्तद्रथं प्रति।
निपेतुः शतशस्तत्र दारुणा दारुणारुताः॥ **6.106.31**॥

जघनेभ्यः स्फुलिङ्गाश्च नेत्रेभ्योऽश्रूणि सन्ततम्।
मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च॥ **6.106.32**॥

एवम्प्रकारा बहवः समुत्पाता भयावहाः।
रावणस्य विनाशाय दारुणाः सम्प्रजज्ञिरे॥ **6.106.33**॥

रामस्यापि निमित्तानि सौम्यानि च शिवानि च।
बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः॥ **6.106.34**॥

निमित्तानीह सौम्यानि राघवः स्वजयाय वै।
दृष्ट्वा परमसंहृष्टो हतं मेने च रावणम्॥ **6.106.35**॥

ततो निरीक्ष्यात्मगतानि राघवो
    रणे निमित्तानि निमित्तकोविदः।
जगाम हर्षं च परां च निर्वृतिं
    चकार युद्धे ह्यधिकं च विक्रमम्॥ **6.106.36**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे षडधिकशततमः सर्गः॥